ISSN: 2583-4630
सुरधुनी (Suradhunī)
अन्तरराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता)
An International Sanskrit E-Research Journal (Peer Reviewed)
Volume-3, Issue-3 (Special Issue), July-September, 2023
Name of Issuing- वैदिकवाङ्मये दर्शनतत्त्वविमर्श :
(Philosophical Thoughts in Vedic Literature)

# उपनिषद्सु वर्णितायां वह्मविद्यायां संवादस्य महत्त्वम्

**शिखा-सरकार-सिकदार :***

**शोधसारः–**

संवादलेखनस्य उत्पत्तिः मुख्यतया ग्रीकसाहित्ये इति बहवः मन्यन्ते। सक्रेटिसस्य मुख्यपात्रत्वेन प्लेटोः स्वात्मनः सर्वदर्शनतत्त्वं संवादेन व्यक्तं करोति। न केवलं दर्शनदृष्ट्या, अपितु नाटकस्य रचनामाधुर्य्यदृष्ट्या च तस्य कृतयः अतुलनीयाः। सक्रेटिसः प्रात्यहिकजीवने अन्यैः पात्रैः सह स्वस्य जीवनस्य जगतः च समस्यानां विषये वाद–विवादं करोतिस्म। तस्य एतत् लक्षणं ‘सक्रेटिसस्य संवादः’ इत्यनेन प्रसिद्धमभवत्। पश्चात् विभिन्नदेशानां प्रसिद्धाः लेखकाः अन्यशैल्याः सह संवादशैल्याः उपयोगं कुर्वन्तिस्म। आङ्लसाहित्ये जार्जवार्कलेमहोदयस्य ‘हाइलास्–फिलोनासयोः च संवादः’ अस्मिन् विषये उल्लेखनीयः[1]। न केवलं संस्कृतसाहित्ये बङ्गसाहित्ये उपन्यासे च संवादमात्रं दृश्यते, अपितु अधिकाधिकाः मुख्योपनिषदाः संवादरूपेण संरचिताः। मुख्योपनिषदाः यथा– ईशः, केन, कठः, प्रश्नः, मुण्डकः, माण्डूक्यः, तैत्तरीयः, ऐतरेयः, छान्दोग्यः, वृहदारण्यकः, कौषीतकीः, श्वेताश्वेतरः, मैत्रायणीयः महानारायणीयोपनिषद् चेति। एतेषामुपनिषदां रचना क्रमशः सप्तम–चतुर्दशशताब्दयोः मध्ये कदाचित् कृता इत्यनुमानितमस्ति। परमेतेषां चतुर्दशोपनिषदां वृहदारण्यकोपनिषदं छान्दोग्योपनिषदं च विद्वांसः प्राचीनतमः, विस्तृततमः, महत्त्वपूर्णोपनिषद् चेति मन्यन्ते। एतेषु उपनिषद्सु अनेकेषु संवादाः सन्ति। एते उपनिषद्विधृतसंवादाः जीवितरूपेण ग्राह्याः। यतो एते संवादाः प्लेटोमहाभागस्य प्रसिद्धसंवादशैल्याः वेषेण जिज्ञासुकानाम् अधिवक्तानां च संघटितं वास्तविकसंवादं रक्षन्ति। चतुर्दशमुख्योपनिषदां केन, कठ, प्रश्नः, वृहदारण्यकः, छान्दोग्यः इत्यादिषु उपनिषद्सु संवादशैली अधिकतया दृश्यते।

*Assistant Professor, Department of Sanskrit, Galsi Mahavidyalaya, Galsi, Station Road, W.B., India.

ISSN: 2583-4630
सुरधुनी (Suradhunī)
अन्तरराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता)
An International Sanskrit E-Research Journal (Peer Reviewed)
Volume-3, Issue-3 (Special Issue), July-September, 2023
Name of Issuing- वैदिकवाङ्मये दर्शनतत्त्वविमर्शः
(Philosophical Thoughts in Vedic Literature)

बृहदारण्यकोपनिषदः द्वितीयाध्याये गार्ग्य–अजातशत्रोः संवादः, याज्ञवल्क्य–मैत्रेयीसंवादः च अस्ति। तृतीयाध्याये राज्ञः जनकस्य सभायां समागतदार्शनिकैः सह याज्ञवल्क्यस्य चतुर्थे अध्याये च राजा जनक–याज्ञवल्क्ययोः संवादः अस्ति। छान्दोग्योपनिषदः सप्तमे अध्याये अस्ति नारद–सनत्कुमारयोः संवादः। कठोपनिषदि यम–नचिकेतयोः संवादः अस्ति। पिप्पलादेन सह षट्ऋषीणां प्रश्नोत्तरशैली संवादशैली वा अथर्ववेदस्य प्रश्नोपनिषदि अस्ति। एतेषु उपनिषद्सु संवादशैल्याः आत्मतत्त्वस्य ब्रह्मतत्त्वस्य वा विषये सम्यक् ज्ञानं कथं सम्भवतीति आलेखस्यास्य वर्णनात्मकः विषयः। आत्मा व्यतिरिक्तेषु इतरविषयेषु यत् आत्मज्ञानं वर्तते तस्य निवृत्तिरिति उपनिषद्सु वर्णितस्य आत्मज्ञानस्य मुख्यविषयः। साक्षात्रूपेण आत्मभावं ब्रह्मणि न स्थातुं शक्यते; यतः सर्वदैव ब्रह्मणि आत्मभावं वर्तते। परं ब्रह्मणि अस्यात्मभावस्य नित्यविद्यमानत्वेऽपि अब्रह्मणि आत्मभावः भासते। शान्तः, स्थिरः पुरुषः यदा ब्रह्मजिज्ञासुः भूत्वा शास्त्रविहितोपदेशानुसारेण आचार्यस्योपदेशानुसारेण च तादृशं प्रज्ञां प्राप्नोति तदा तस्यात्मनः विषये पुनः प्रश्नानां स्थानं न भविष्यति; यतो हि एषः आत्मसाक्षात्कारः सर्वेभ्यः लौकिकेभ्यः प्रियतरः अस्ति।

**सूचकशब्दाः** – आत्मतत्त्वम्, उपनिषद्, संवादं, संभाषणं, ब्रह्मविद्या।

वेदः खलु भारतस्य प्राचीनतमम् आर्यसाहित्यं हिन्दुसभ्यतायाः च आधारः। यतः हिन्दुसभ्यता, संस्कृतिः, साहित्यं दर्शनञ्च वेदानामाधारेण सृष्टम्। वैदिकभाषा च प्राचीनतमा आर्यभाषा। वेदः मानवजातेः आदिशास्त्ररूपेण परिचितः; यतो हि प्राचीनकाले रचितेषु प्रत्येकस्मिन् शास्त्रेषु (धर्मशास्त्रं, दर्शनं, पुराणं, काव्यम् इत्यादयः) वेदानां प्रभावः अवलोकितः। वेदशब्दस्यार्थः ज्ञानं विद्या वा। ज्ञानमिदं परमं ज्ञानं, विद्या च पराविद्या। वेदानाम् उत्पत्तिकालविषये पण्डितानां मतभेदो अस्ति। विषयेऽस्मिन् म्याक्समूलारमहोदयस्य मतं यत्, १२०० ई. पूर्वाब्दः वेदस्य प्रादुर्भावकालोऽस्ति, यस्य समर्थनं अधिकाधिकविद्वांसः कुर्वन्ति। वेदोऽयं कर्मज्ञानानुसारेण काण्डद्वयेन विभक्तः। किन्तु समग्रवेदस्य कस्मिन् अपि भागे एतयोः काण्डद्वयोः पृथग्रूपेण उल्लेखः

सुरधुनी (Suradhunī)
ISSN: 2583-4630
अन्तरराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता)
An International Sanskrit E-Research Journal (Peer Reviewed)
Volume-3, Issue-3 (Special Issue), July-September, 2023
Name of Issuing- वैदिकवाङ्मये दर्शनतत्त्वविमर्शः
(Philosophical Thoughts in Vedic Literature)

नास्ति। तथापि संहिता–शुद्धब्राह्मण इत्येतयोः भागद्वयोः विषये चर्चा कर्मकाण्डे अन्तर्भवति। वैदिकदेवतातत्त्वम् एकः महत्वपूर्णः विषयः, यतः कर्मकाण्डे समग्ररूपेण देवानां रूप–गुण–कर्म इत्येताः विषयाः प्रशंसासूचकमन्त्रेण परिपूर्णाः। परन्तु अस्य सिद्धान्तस्य विवेकपूर्णविश्लेषणेन ज्ञायते यत्, वैदिकऋषिभिः प्रकृतेः शरीरे अलौकिकसिद्धान्तः साक्षात्कृतः। पकृतेः घटनासु क्रमः अस्ति इत्यपि तेषां मतमासीत्। सर्वकर्मणाम् एक एव कर्ता अस्ति, यः देवत्वेन समग्रजगतः कर्ता, शासकः भासकः च अस्ति इति च ते अवगच्छन्तिस्म। तदनन्तरं वैदिककाले कृता नानादेवतापूजा, यज्ञादिकं व्यर्थम् अवास्तविकं वा – इत्यस्मिन् विषये क्रमेण आर्यगणस्य मनसि संशयः प्रादुर्भूतः। विशेषतः यदा आर्याः संसारं त्यक्त्वा वनवासिनः भूत्वा नानाप्रतीकयागेषु मानसयागेषु च प्रवृत्यारनन्तरं ध्यानोपासनायां च लीनः अभवत् तदा तेषां मनसि जीवानामुत्पत्तिः, अस्तित्वं, विनाशः, पुनर्जन्म इत्यादयः प्रश्नाः समुद्भूताः। फलतः ते एतेषां प्रश्नानामुत्तराणि अण्विष्यमाणाः निष्कर्षं प्राप्तवन्तः– जीवब्रह्मणोः एकता। अतः प्राचीनार्याणां सत्यानुसन्धस्य आत्मचिन्तनस्य वा जिज्ञासायाः परिणामरूपेण उपनिषदामुत्पत्तिरभवत्, या वेदस्य अधोभागे स्थिता। अतः उपनिषदः अन्यत् नाम वेदान्तो इति।

उपनिषद् खलु प्राचीनऋषीणां विस्मया सृष्टिः, यद् वेदसदृशशास्त्रस्याश्रयेण जातः, तथापि स्वतन्त्रचिन्तनं मनुष्यस्य प्रारम्भिकदार्शचिन्तनं च प्रदर्शयति। एतदतिरिक्तम् उपनिषदि सर्वात्रिकानन्दस्य प्रकटीकरणमपि परिलक्षितम्। तथा उपनिषदि परमसत्ता आनन्दरूपेण अमृतरूपेण च वर्णिता[2]। एतादृशेन आनन्दरसेन प्लावितं साहित्यमतिदुर्लभम् अस्ति। एशियाटिकसमाजस्य संस्थापकः उइलियम्जोन्स्महाभागा एव प्रथमं संस्कृतसाहित्यस्य अमूल्यनिधिभिः सह पाश्चात्यजनानां सम्बन्धः कृतवान्। सः उपनिषद्पाठेन एतावत् मोहितः अभवत् यत् तान् आनन्देन प्रशंसतिस्म। पश्चात् प्रसिद्धः जर्मन–दार्शनिकः शोपेनहरः अपि तथैव उपनिषद्पठनेन मुग्धः अभवत्। उपनिषदं प्रति तेन यत् श्रद्धाञ्जलिः लिखिता सा दुर्लभा।

ISSN: 2583-4630
सुरधुनी (Suradhunī)
अन्तरराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता)
An International Sanskrit E-Research Journal (Peer Reviewed)
Volume-3, Issue-3 (Special Issue), July-September, 2023
Name of Issuing- वैदिकवाङ्मये दर्शनतत्त्वविमर्शः
(Philosophical Thoughts in Vedic Literature)

तन्मतानुसारेण उपनिषद्सदृशं हितकरं उत्कृष्टं च पुस्तकं समग्रजगति नास्ति। उपनिषद् तस्य जीवने सन्तुष्टिः आनयिष्यति। अनन्तरकाले ब्राह्मणभागे यत्र यज्ञकर्म परित्यज्य ध्यानं समाहितं तद् खलु उपनिषद् इति। किन्तु उपनिषदः अर्थविषये विद्वज्जनानाम् उर्वरमस्तिष्कशक्तेः प्रयोगेन प्रकरणं जटिलं जातम्। अतः उपनिषदः अर्थविषये किञ्चित् विस्तृतविमर्शस्य आवश्यकता अस्ति। अस्मिन् सन्दर्भे डयसन्महोदयेन उपनिषद् गूढज्ञानम् इत्यनेन व्याख्यातम्[3]। अपरपक्षे प्रसिद्धः भारतीयशास्त्रविद्वान् म्याक्समूलरमहाभागा अवदत्, यतः उपनिषदः चर्चा गुरोः समीपे उपविश्य कृता तस्मात् एतत् नाम प्राप्तम्। तन्मते मुख्यतः उपनिषदः सभा इत्यर्थः आसीत्। विशेषतः येषु सभासु शिष्याः गुरोः किञ्चित् व्यवधानं स्थापयित्वा तस्य परितः समागच्छन्तिस्म[4]। वासुदेवशर्मणा अष्टोत्तरशतोपनिषदां संकलने उपस्याभिप्रायः गुरोः परामर्शः, नि अर्थे निश्चितज्ञानम् सद् इत्यस्य अर्थेन च जन्म–मरणबन्धनानि नकारयति इति व्याख्यातः। अतः पूर्णार्थः अस्ति– गुरोः सकाशात् प्राप्तं यद् निश्चितज्ञानं जन्म–मरणबन्धनं नकारयति तद् उपनिषद्। तैत्तरीयोपनिषद्भाष्यस्य प्रारम्भे शङ्कराचार्यकृतस्य उपनिषदः व्याख्या अस्ति– ब्रह्मज्ञानम् उपनिषद् इत्युच्यते, ये हि ब्रह्मज्ञाने निवेशयन्ति तेषां कृते जन्म–मरणादिबन्धाः शिथिलाः भवन्ति, अथवा सम्पूर्णतया निष्कासिताः भवन्ति, अथवा शिष्यं ब्रह्मणः सन्निधौ आनीतः, अथवा तस्मिन् परब्रह्म संनिहितः भवति।

उपनिषद् खलु वेदज्ञानकोषस्य बहुमूल्यं रत्नम्, यतः उपनिषदेव अस्मान् पूर्णात्मज्ञानस्य भूमानन्दस्य च अन्वेषणं ददाति। परमात्मा एव परब्रह्म। यथा परमतत्त्वमेतत् उपनिषदां वर्णितं, तथा तस्य अन्यत् नाम ब्रह्मविद्या इति– सेयं ब्रह्मविद्या उपनिषच्छब्दवाच्या[5]। उपनिषद्शब्दस्य व्युत्पत्तिः यथा– उप–नि–सद् धातोरनन्तरं क्विप्प्रत्यययोगेन उपनिषद् शब्दोऽयं निष्पन्नः। यद्यपि गणपाठे सद्धातोः विविधाः अर्थाः प्राप्यन्ते तथापि अत्र गत्यवसानादयः प्रमुखाः अर्थाः प्रसिद्धाः। उप–इत्यनेनोपसर्गेन समीपवर्तिता सूचिता नि उपसर्गश्च निश्चयार्थकः भवति। अतः विनयेन गुरोः समीपं गत्वा येन शास्त्रेण उपदेशेन वा शिष्यस्य अज्ञानं निवर्तते, तदुपनिषद्। केषाञ्चनमते, नि

ISSN: 2583-4630
सुरधुनी (Suradhunī)
अन्तरराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता)
An International Sanskrit E-Research Journal (Peer Reviewed)
Volume-3, Issue-3 (Special Issue), July-September, 2023
Name of Issuing- वैदिकवाङ्मये दर्शनतत्त्वविमर्शः
(Philosophical Thoughts in Vedic Literature)

उपसर्गः खलु शिष्यस्य विनयस्य सूचकः। अतः गुरोः समीपमुपसन्नम् उपविष्टं वा विनयशीलशिष्यं प्रति गुरुणा प्रदत्तं गूढोपदेशम् अथवा तत्परामर्शं दातुं ग्रहणाय च गुरुशिष्ययोः रहसि अवस्थानमेव उपनिषद्। यद्यपि उपनिषद्शब्दस्य मुख्यार्थः शिष्यं प्रति गुरोः गुप्तोपदेशः अस्ति तथापि येषु शास्त्रेषु गुह्योपदेशोऽयम् अभिलिखितः ते सर्वे अपि उपनिषद्पदवाच्याः। अतः ब्रह्मविद्या एव उपनिषद्शब्दस्य मुख्यार्थः। तदतिरिक्तं उपसद्शब्दोऽयम् उप–सद्धातोः निष्पन्नः भवति, यस्यार्थः खलु यज्ञाङ्गविशेषः। उपसद्शब्दस्य यज्ञाङ्गविशेषार्थे वैदिकसाहित्ये बहुप्रयोगः दृश्यते। यथा– द्वादशाहं उपसद्व्रती भूत्वा[6], यद् रमते तद् उपसदः[7] इत्यादयः। पूर्वे एवंप्रकारेण गुरुणा उपसन्नशिष्याय ब्रह्मविद्यायाः उपदेशं व्याख्यातम्–

तस्मै स विद्वानुपसन्नाय सम्यक् प्रशान्तचित्ताय शमान्विताय।
येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्।।[8]

विषयेऽस्मिन् उल्लेख्यं यत्, कठोपनिषदि दृश्यते– यदा नचिकेता जिज्ञासुरूपेण यमं निकषा गतः तदा यमः विविधपरीक्षां कृत्वा तस्मै उपदेशं दत्तवान्। तथैव इन्द्रः प्रतर्द्दनं (कौषितकी उपनिषदि, 3.1), रैक्यः जानश्रुतिं (छान्दोग्योपनिषदि, 4.2), सत्यकामः उपकोशलं (छान्दोग्योपनिषदि, 4.10), प्रावाहनः आरुणिं (वृहदारण्यकोपनिषदि, 6.2.6), जनकः याज्ञवल्क्यं (वृहदारण्यकोपनिषदि, 4.3.1), शाकायण्यश्च वृहद्रथं (मैत्रायण्युपनिषदि, 1.2) परीक्ष्य ब्रह्मविद्यामुपदिशत्। अतो विद्यैषा रहस्यविद्या गुह्यविद्या वा इत्यनेनापि ज्ञातुं शक्यते। अस्मिन् सन्दर्भे उपनिषद्साहित्ये उक्तं यत्– य इदं परमं गुह्यं श्रावयेत् ब्रह्मसंसदि[9], वेदान्ते परमं गुह्यं पुराकल्पे प्रचोदितम्[10], एतत् वै महोपनिषदं देवानां गुह्यम्[11] इत्यादयः।

संवादविधायाम् उपनिषद्विधृतस्य आत्मतत्त्वस्य ब्रह्मविद्यायाः वा चर्चायाः पूर्वे संवादविषये ज्ञातव्यम्। संवादः खलु नाटकस्य पात्राणां मध्ये संभाषणं, यस्य आङ्लसमतुल्यः Dialogue इति। अतः द्वयोः अधिकयोः वा जनानां संभाषणं संवादः इत्युच्यते। परं तस्य अधिकाधिकशब्दाः

ISSN: 2583-4630
सुरधुनी (Suradhunī)
अन्तरराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता)
An International Sanskrit E-Research Journal (Peer Reviewed)
Volume-3, Issue-3 (Special Issue), July-September, 2023
Name of Issuing- वैदिकवाङ्मये दर्शनतत्त्वविमर्शः
(Philosophical Thoughts in Vedic Literature)

एकान्तिकाः, असम्पूर्णाः, सम्यक् वाक्यविन्यासेन यथार्थशब्दप्रयोगेन वा न सुसंगताः इति। अन्यतः एकान्तवाक्यानि अपूर्णवाक्यानि वा लिखितसंवादे प्रयोक्तुं न शक्यते। तत्र भाषिकपूर्णता, अर्थगतपूर्णता च भवितुमर्हति। अतः संवादः एकः रोचकः वाक्–विधिः, यत्र काल्पनिक–मुद्रा प्रयोक्तव्या भवति। परं भाषायाः गतिशीलता अपि भवितुमर्हति, अन्यथा संवादः केवलं वक्तुः श्रोतुश्च उत्तर–प्रतिक्रियायां च परिणामी भविष्यति। द्वयोः अधिकयोः वा जनानां लिखितरूपेण कथितरूपेण वा वाक्कौशलमेव संवादः, येन साहित्यिक–नाट्यरूपसंवादस्य आदान–प्रदानमपि चित्रितम्। दार्शनिकानां संभाषणविधिरूपेण पश्चिमे अस्य सम्बन्धः सक्रेटिससंवादेन सह अस्ति, यः मुख्यतः प्लेटोमहाभागेन विकसितः आसीत्। परं प्राचीनसाहित्येन भारतीयसाहित्येन च सह अन्येषु परम्परासु अपि संवादस्य व्यवहारः दृश्यते[12]। सामान्यसंभाषणेन सह संवादस्य केचन भेदाः अवलोकिताः भवन्ति। संवादः पूर्वनियोजितः भवति, येन लेखकः एकं शोधप्रबन्धविन्दुं प्रमाणस्तरं प्रति चालयति। अपिच कस्यचित् विषयस्य प्रश्नस्य वा उभयपक्षं प्रस्तुतुं लेखकैः संवादं सर्वदा उत्तमयुक्तिः इति मन्यते। इत्यर्थात् लेखकः द्वयोः पात्रयोः माध्यमेन प्रश्नस्य परस्परविरुद्धपक्षद्वयं प्रस्तुतं करोति, यत्र तर्कस्य खण्डनादारभ्य निष्कर्षपर्यन्तं कस्यापि विवादस्य स्थानं नास्तीति। यः पात्रः नायकस्य प्रतिद्वन्द्वस्य भूमिकां निर्वहतिस्म सः अपि निर्णयस्य तर्कं स्वीकरोति। अतः संवादशब्दस्य अर्थः संभाषणं वार्तालापं वा। एषः साहित्ये 'नाटकस्य पात्राणां संवादः' इत्यनेनापि निर्दिश्यते। नाटकस्य महत्तपूर्णः भागः संवादः अस्ति। अनेन संवादेनैव नाटकस्य विषयः चरित्रनिर्माणञ्च मूर्तरूपेण प्रतिभातम्। मुख्यतया संवादस्य पक्षद्वयमस्ति– नाटकीयं शाश्वतसाहित्यिकञ्च। प्राचीनग्रीकसाहित्येषु लैटिनसाहित्येषु च संवादस्य प्रयोगः उपदेशात्मकरूपेण व्याङ्गात्मकरूपेण च आसीत्[13]।

संवादलेखनस्य उत्पत्तिः मुख्यतया ग्रीकसाहित्ये इति बहवः मन्यन्ते। सक्रेटिसस्य मुख्यपात्रत्वेन प्लेटोः स्वात्मनः सर्वदर्शनतत्त्वं संवादेन व्यक्तं करोति। न केवलं दर्शनदृष्ट्या, अपितु

ISSN: 2583-4630
सुरधुनी (Suradhunī)
अन्तरराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता)
An International Sanskrit E-Research Journal (Peer Reviewed)
Volume-3, Issue-3 (Special Issue), July-September, 2023
Name of Issuing- वैदिकवाङ्मये दर्शनतत्त्वविमर्शः
(Philosophical Thoughts in Vedic Literature)

नाटकस्य रचनामाधुर्य्यदृष्ट्या च तस्य कृतयः अतुलनीयाः। सक्रेटिसः प्रात्यहिकजीवने अन्यैः पात्रैः सह स्वस्य जीवनस्य जगतः च समस्यानां विषये वाद–विवादं करोतिस्म। तस्य एतत् लक्षणं 'सक्रेटिसस्य संवादः' इत्यनेन प्रसिद्धमभवत्। पश्चात् विभिन्नदेशानां प्रसिद्धाः लेखकाः अन्यशैल्याः सह संवादशैल्याः उपयोगं कुर्वन्तिस्म। आङ्लसाहित्ये जार्जवार्कलेमहोदयस्य 'हाइलास्–फिलोनासयोः च संवादः' अस्मिन् विषये उल्लेखनीयः[14]। न केवलं संस्कृतसाहित्ये बङ्गसाहित्ये उपन्यासे च संवादमात्रं दृश्यते, अपितु अधिकाधिकाः मुख्योपनिषदाः संवादरूपेण संरचिताः। मुख्योपनिषदाः यथा– ईशः, केन, कठः, प्रश्नः, मुण्डकः, माण्डूक्यः, तैत्तरीयः, ऐतरेयः, छान्दोग्यः, वृहदारण्यकः, कौषीतकीः, श्वेताश्वेतरः, मैत्रायणीयः महानारायणीयोपनिषद् चेति। एतेषामुपनिषदां रचना क्रमशः सप्तम–चतुर्दशशताब्दयोः मध्ये कदाचित् कृता इत्यनुमानितमस्ति। परमेतेषां चतुर्दशोपनिषदां वृहदारण्यकोपनिषदं छान्दोग्योपनिषदं च विद्वांसः प्राचीनतमः, विस्तृततमः, महत्त्वपूर्णोपनिषद् चेति मन्यन्ते। एतेषु उपनिषद्सु अनेकेषु संवादाः सन्ति। एते उपनिषद्विधृतसंवादाः जीवितरूपेण ग्राह्याः। यतो एते संवादाः प्लेटोमहाभागस्य प्रसिद्धसंवादशैल्याः वेषेण जिज्ञासुकानाम् अधिवक्तानां च संघटितं वास्तविकसंवादं रक्षन्ति। चतुर्दशमुख्योपनिषदां केन, कठ, प्रश्नः, वृहदारण्यकः, छान्दोग्यः इत्यादिषु उपनिषद्सु संवादशैली अधिकतया दृश्यते। वृहदारण्यकोपनिषदः द्वितीयाध्याये गार्ग्य–अजातशत्रोः संवादः, याज्ञवल्क्य–मैत्रेयीसंवादः च अस्ति। तृतीयाध्याये राज्ञः जनकस्य सभायां समागतदार्शनिकैः सह याज्ञवल्क्यस्य चतुर्थे अध्याये च राजा जनक–याज्ञवल्क्ययोः संवादः अस्ति। छान्दोग्योपनिषदः सप्तमे अध्याये अस्ति नारद–सनत्कुमारयोः संवादः। कठोपनिषदि यम–नचिकेतयोः संवादः अस्ति। पिप्पलादेन सह षट्ऋषीणां प्रश्नोत्तरशैली संवादशैली वा अथर्ववेदस्य प्रश्नोपनिषदि अस्ति। एतेषु उपनिषद्सु संवादशैल्याः आत्मतत्त्वस्य ब्रह्मतत्त्वस्य वा विषये सम्यक् ज्ञानं कथं सम्भवतीति आलेखस्यास्य वर्णनात्मकः विषयः।

ISSN: 2583-4630
सुरधुनी (Suradhunī)
अन्तरराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता)
An International Sanskrit E-Research Journal (Peer Reviewed)
Volume-3, Issue-3 (Special Issue), July-September, 2023
Name of Issuing- वैदिकवाङ्मये दर्शनतत्त्वविमर्शः
(Philosophical Thoughts in Vedic Literature)

शुक्लयजुर्वेदस्य शाखाद्वयं यथा– काण्व माध्यन्दिन् चेति। काण्वशाखायाः शतपथब्राह्मणे सप्तदशोऽध्यायाः सन्ति। एतेषां सप्तदशकाण्डानाम् अन्तिमसप्तकाण्डाः एव वृहदारण्यकोपनिषद् इत्यनेन प्रसिद्धाः। उपनिषदोऽयं षट् अध्यायविशिष्टः। अस्योपनिषदः संक्षिप्तसारम् अध्यायक्रमेण चर्चा कर्तुं शक्यते। प्रथमे अध्याये यथा प्राणस्य, मृत्योः, पुरुषस्य च महत्वस्य व्याख्या, तथैव उपदेशात्मकलघुकथया ब्रह्माण्डविज्ञानेन च प्राणस्य श्रेष्ठता संस्थापिता। गार्ग्य–अजातशत्रोः संवादः अस्ति द्वितीयाध्याये। अपिच अत्र याज्ञवल्क्यस्य दध्यङ् अथर्वन् ऋषेश्च परिचयेन सह याज्ञवल्क्य–मैत्रेयीसंवादः प्राप्यते। तृतीये अध्याये राज्ञः जनकस्य सभायां समागतदार्शनिकैः सह याज्ञवल्क्यस्य संवादः अस्ति। जनक–याज्ञवल्क्ययोः संवादः चतुर्थे अध्याये दृश्यते। पञ्चमे अध्याये ब्रह्माण्डविज्ञानं, जीवाश्मविज्ञानं, नीतिशास्त्रं चेत्यादयः दुरूहविषयाः सन्ति। अन्तिमांशे असंबद्धाः विषयाः सन्ति, ये उपनिषदः मूलं भवति। अस्योपनिषदः द्वितीयाध्याये गार्ग्यः अजातशत्रुमाह, 'ब्रह्मोपदेशं प्रदास्यामि' इति[15]। ततः उभयोः संभाषणात् संवादात् वा ब्रह्म अस्य जगतः निर्माता इति ज्ञानं प्राप्तुं शक्यते; यतो अत्र ब्रह्म आकाशः, वायुः, इन्द्रः अग्निः, जलं, दीप्तिमत्, प्राणः, दिगात्मा चेत्यनेन प्रकारेण वर्णितम्। ततः अजातशत्रुः विज्ञानरूपपुरुषस्य चर्चा प्रसङ्गेन गार्ग्यं वदति यत्, यदा जीवोऽयं एवंप्रकारेण सुप्तोऽभवत् तदा विज्ञानरूपपुरुषोऽयं स्वविज्ञानेन प्राणानां विज्ञानं सामर्थ्यं वा स्वीकृत्य हृदयान्तर्गते आकाशे सुप्तवान्। अथ अनेन पुरुषेण घ्राणेन्द्रियं, वाक्, नेत्रं, श्रोत्रं मनश्च गृह्णाति[16]। अपिच अस्मात् आत्मनः परमपुरुषात् वा जनराशिः, देवराशिः, भूतराशिः चेत्यादयश्च तथैव निर्गच्छन्ति, यथा ऊर्णनाभिः स्वशरीरस्थितसूत्रेण ऊर्ध्वे आरोहति यथा च सर्वतः अग्नेः स्फुलिङ्गाः निर्गच्छन्ति[17]।

द्वितीयाध्यायस्य चतुर्थे ब्राह्मणे याज्ञवल्क्यः कुटुम्बं त्यक्त्वा सन्न्यासः ग्रहीतुमिच्छुकः स्वसर्वं सम्पदं मैत्रेयी–क्त्यायनी चेत्युभयोः भार्ययोः समानरूपेण विभक्तुं निश्चयं करोति। परं तु मैत्रेयी ज्ञातुमिच्छति यत्, उक्तसम्पदेन अमृतलाभं भविष्यति न वेति। मैत्रेय्याः प्रश्नस्यास्य

ISSN: 2583-4630
सुरधुनी (Suradhunī)
अन्तरराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता)
An International Sanskrit E-Research Journal (Peer Reviewed)
Volume-3, Issue-3 (Special Issue), July-September, 2023
Name of Issuing- वैदिकवाङ्मये दर्शनतत्त्वविमर्शः
(Philosophical Thoughts in Vedic Literature)

समाधानप्रसङ्गेन याज्ञवल्क्यस्य उपदेशः सम्यक् आत्मतत्त्वस्योपदेशः आसीत्। सांसारिकसम्बन्धान् उपमारूपेण प्रयुज्य तेन उक्तं यत्, पतिः, भार्या, पुत्रादयः अस्माकं सर्वेषां प्रेम्णः कृते न प्रियः, अपितु आत्मनः प्रेम्णा एव प्रियः भवति[18]। ततः विविधाः प्रश्नाः उद्भवन्ति। यथा– किं लौकिकवस्तूनि आत्मनः पृथक् भवन्ति, आत्मा सर्वेषामतिरिक्तं किमपि लघुवस्तु वेति। किम् अस्य लघुवस्तुनः कारणात् समुदायविषयाः सर्वैः प्रियाः भवन्ति? एतेषां प्रश्नानां समाधानविषये याज्ञवल्क्य–मैत्रेयीसंवादेन प्रकाश्यते यत्, आत्मा खलु महान् सत्ता इति यस्मात् परं किमपि नास्ति, सर्वाणि वस्तूनि यस्यान्तर्गताः। अस्यात्मनः दर्शनेन, श्रवणेन, ध्यानेन निदिध्यासनेन च विषयाः ज्ञातुं शक्यते[19]। तृतीयाध्याये अश्वल–याज्ञवल्क्यसंवादेन मृत्योरनन्तरम् आत्यन्तिकमुक्तिः, स्वर्गगमनोपायः चेत्येतेषां विषयाणां चर्चया आत्मतत्त्वविषये ब्रह्मतत्त्वविषये वा ज्ञानस्य व्याप्तिरपि विस्तारिता। आत्मैव सर्वान्तरस्थितः इति भुज्यु–याज्ञवल्क्यसंवादेन प्रकाश्यते। उद्दालक–याज्ञवल्क्ययोः संभाषणेन ज्ञायते यत्, यः इहलोके विराजितः परं जगतः पृथक्, यः जगत् न जानाति, यस्य शरीरं जगत् यश्च जगतः अन्तःस्थित्वा जगत् नियन्त्रयति सः आत्मा, अन्तर्यामी अमृतरूपश्चेति[20]। अतः यो अप्–अग्निः–अन्तरिक्षः–वायुः–द्युलोकः–तमः–तेजः–सर्वभूतः–प्राणः–त्वक्–विज्ञानः–जीवः इत्येतेषु स्थितः, तस्मात् पृथक् सन् सः यं न जानाति, परं स एव यस्य शरीरं, तस्यैव च अभ्यन्तरे स्थित्वा त्वमेव नियन्त्रयति, सः अन्तर्यामी, अमरः, स्वात्मा चेति। अस्मात् आत्मनः परं सर्वं नाश्यम्। विज्ञानमयः आनन्दमयश्च ब्रह्म एव जगतः कर्ता। ब्रह्मविद्जीवस्यैव ब्रह्म परमं गतिः[21]। अपिच जनक–याज्ञवल्क्यसंवादेन ज्ञायते यत्, यदा एतत् आत्मतत्त्वं सम्यग्रूपेण ज्ञायते तदा पुरुषः कस्यापि कर्माणि न प्रवर्तते। एषः एव पुरुषः शान्तः, दान्तः, उपरतः, तितिक्षुः समाहितश्च भूत्वा स्वात्मनि परमात्मनं साक्षात् करोति। इत्यर्थात् स्वात्मनि एव सर्वानि वस्तूनि द्रष्टुं शक्नोति। तदनन्तरं याज्ञवल्क्य–मैत्रेयीसंवादेन आत्मतत्त्वमिदम् अधिकं स्पष्टं भवति। उभयोः मध्ये दीर्घकालं यावत् प्रश्नोत्तराणामन्ते सिद्धान्तरूपेण याज्ञवल्क्येन

ISSN: 2583-4630
सुरधुनी (Suradhunī)
अन्तरराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता)
An International Sanskrit E-Research Journal (Peer Reviewed)
Volume-3, Issue-3 (Special Issue), July-September, 2023
Name of Issuing- वैदिकवाङ्मये दर्शनतत्त्वविमर्शः
(Philosophical Thoughts in Vedic Literature)

उक्तं यत्, अयमात्मा अवश्यमेव द्रष्टव्यः, श्रोतव्यः, ध्यानं कुर्यात् निदिध्यासनं च कर्तव्यः इति। दर्शनेन, श्रवणेन, मननेन निदिध्यासनेन च आत्मज्ञानेन जगतः सर्वं ज्ञायते[22]। पुनः आत्मा 'नेति नेति' रूपेणापि ज्ञायते।

सामवेदस्य छान्दोग्योपनिषदः अन्तिमप्रकरणस्य समापनभागे आत्मतत्त्वविमर्शः अस्ति। प्रथमेषु पञ्च अध्यायेषु क्रमशः यज्ञानुष्ठानविधिः, ब्रह्माण्डविज्ञानं, सूर्यस्य उपासना उत्पत्तिश्च, सत्यकामस्योपदेशः, प्रेततत्त्वस्य च चर्चा अस्ति। षष्ठोऽध्याये अस्ति 'तत् त्वम् असि'– इत्यनेन महावाक्येन आध्यात्मिकविमर्शस्य चर्चा। ध्यानेन मनस्तत्त्वः भूमा इति विषयस्य च वर्णना नारद–सनत्कुमारयोः संवादेन सप्तमे अध्याये अस्ति। अन्तिमे अर्थात् अष्टमे अध्याये ब्रह्मसाक्षात्कारस्योपायः ब्रह्मणः प्रकृतेश्च विस्तृतविमर्शः अस्ति। आरुणि–श्वेतकेतयोः संवादेन संभाषणेन वा ज्ञायते यत्, आरुणिः श्वेतकेतुम् आत्मज्ञानस्य उपदेशप्रदानकाले उदाहरणरूपेण उक्तवान्, यथा मृत्तिकाखण्डस्य ज्ञानेन सर्वानि मृद्द्रव्यानि ज्ञायन्ते, सुवर्णखण्डस्य ज्ञानेन च यथा सर्वानि सुवर्णवस्तूनि ज्ञायन्ते, तथा एकाद्वितीयं, सद्रूपं च परमात्मज्ञानेनैव जगतः सर्वानि वस्तूनि ज्ञायन्ते। अत्र मृत्वस्तूनि खलु मृत्पिण्डस्य स्वर्णाभरणानि च सुवर्णपिण्डस्य विकाराः। परमत्र विकारः शब्दात्मकं नाममात्रञ्चेति। अतः सुवर्णपिण्डं, मृत्पिण्डं, ब्रह्मैव च केवलं सत्यम्[23]।

कृष्णयजुर्वेदस्य तैत्तरीयशाखायाः काठक कठ वेति ब्राह्मणस्यान्तर्गतः कठोपनिषद् मुख्यतया अर्वाचीनतरः पद्येन रचितः उपनिषद् इति। अस्योपनिषदः प्रथमाध्याये आत्मतत्त्वविषये जिज्ञासायाः उदयमानत्वेऽपि द्वितीयाध्याये प्रश्नोत्तरसत्रेण विषयोऽयं सुस्पष्टरूपेण वर्णितः। ऋग्वेदस्य दशममण्डलस्य शतोधिकपञ्चत्रिंशत् इत्यस्य सूत्रस्य देवता यमः ऋषिकुमारश्च। वैदिकसूक्तस्य प्रभावः कठोपनिषदि दृश्यते। वाजश्रवसपुत्रस्य नचिकेतः बहु ज्ञातुमिच्छति। वाजश्रवसैः यज्ञस्य निमित्तं संगृहीताः वृद्धाः दुर्वलाश्च गावः दृष्ट्वा नचिकेतः 'पिता यज्ञं वञ्चयति' इति अनुभवतिस्म। दीर्घक्षणं यावत् पिता–पुत्रयोः वाक्–वितण्डायाः अनन्तरं वाजश्रवसः मृत्योः

ISSN: 2583-4630
सुरधुनी (Suradhunī)
अन्तरराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता)
An International Sanskrit E-Research Journal (Peer Reviewed)
Volume-3, Issue-3 (Special Issue), July-September, 2023
Name of Issuing- वैदिकवाङ्मये दर्शनतत्त्वविमर्शः
(Philosophical Thoughts in Vedic Literature)

देवता यमं निकषा स्वपुत्रं दानं कर्तुमिति प्रस्तावमयच्छत्। ततः नचिकेता यमालयं गत्वा यमेन सह संभाषणेन संवादेन वा त्वं तुष्टमकरोत्। फलतः यमराजः नचिकेतः वचनेन सन्तुष्टः सन् त्रिभिः आशीर्वादैः आत्मतत्त्वविषये तस्य सर्वान् संशयान् निराकृतवान्। आत्मसाक्षात्कारविषये यमराजेन नचिकेताप्रदत्तेषु वरत्रयेषु प्रथमः, सर्वे वेदाः यं लक्ष्यं निर्देशयन्ति, सर्वे तपः यस्य विषये वदन्ति, यन्निमित्तं जीवाः ब्रह्मचर्यं पालयन्ति, तत् लक्ष्यं संक्षेपेण वदामि– औम् तदेव[24]। ततः माहात्म्यकीर्तनेन औम् इत्येतत् ब्रह्म इति निर्दिश्यते। औम् इत्यस्य ब्रह्मणः वा ज्ञानेनैव जीवः ब्रह्मलोकः प्राप्नोति। तत्त्वदर्शीभिः एतत् ब्रह्म समाहितसूक्ष्मबुद्ध्या एव प्रतीयते[25]। अनेन आत्मज्ञानेन जीवः मृत्योः निर्मुक्तो भवति। तत्र उल्लेखनीयं यत्, नचिकेतः प्रश्नः आसीत् मृत्योरनन्तरं किमपि अस्ति न वेति? कठोपनिषदः प्रथमाध्याये अस्ति मृत्योः मुक्तेरुपायविषये चर्चा। द्वितीयाध्याये दृश्यते यत्, येन प्रत्यगात्मनः ब्रह्मणः वा सोपाधिकस्वरूपं निरुपाधिकस्वरूपञ्च ज्ञायते तस्मै परमात्मा स्वयमागत्य उपदेशप्रदानं करोति। यमराजेन प्रदत्तानामेतेषां प्रश्नानामुत्तरेण तत्कालीनजनमनसि उत्पन्नाः विविधाः प्रश्नाः संशयाः वा निराकृताः। प्रश्नोपनिषद् खलु अथर्ववेदस्य ब्राह्मणभागस्यान्तर्गतः उपनिषद्। अस्योपनिषदः विषयः यथा सुकेशादिषट्ऋषिभिः सह पिप्पलादऋषेः संवादः। अत्र पिप्पलादऋषिणा जगत्सृष्टेः उत्सः, स्थूलशरीरस्य धारकरूपेण प्रकाशकरूपेण च प्राणस्य श्रेष्ठत्वं, प्राणस्य उत्पत्ति–स्थितिविषये च विचाराः, स्वप्नावस्थायाः वर्णना, परापरब्रह्मणः उपासना इत्येतेषां प्रश्नानां चर्चावसरे उदाहरणसहायकेन आत्मतत्त्वं व्याख्यातम्। अपिच अत्र प्राणः एव परब्रह्म– इत्यनया उपलब्ध्या सर्वात्मरूपेण प्राणस्य माहात्म्यं कीर्तितम्[26]। यद्द्रव्यमस्मिन् लोके विद्यते यद्वा दिवि स्थितं तत् सर्वं प्राणाधीनम्। जीवः प्राणावस्थां सम्यक् विज्ञाय अमृतसदृशमानन्दस्वरूपञ्च परमात्मनं प्राप्नोति। इत्यर्थात् तेन आनन्दमयेन सह नित्यं संयोगसुखमनुभवति। गार्ग्यमुनिकृतप्रश्नस्य उत्तररूपेण पिप्पलादऋषिणा उदाहरणरूपेण उक्तं यत्, आकाशे उड्डीयमानाः पक्षिणः यथा

सायंकाले स्वगृहं प्रत्यागत्य सम्यक् विश्रामं कुर्वन्ति, तथैव पृथिव्याः आरभ्य प्राणपर्यन्तं सर्वेषां तत्त्वानामात्मा परब्रह्मणि पुरुषोत्तमे वा आश्रिताः; यतः सः सर्वेषामाश्रयः इति[27]। अतः सर्वस्याधाररूपेण परमात्मानं ज्ञातव्यम्। आत्मतत्त्वमिदं ज्ञात्वा मृत्युभयं विमुक्त्वा सदैव अमरः भवेत्।

उपनिषद्सु वर्णितस्यास्य आत्मज्ञानस्य मुख्यविषयः यत्, आत्मा व्यतिरिक्तेषु इतरविषयेषु यत् आत्मज्ञानं वर्तते तस्य निवृत्तिरिति। साक्षात्रूपेण आत्मभावं ब्रह्मणि न स्थातुं शक्यते; यतः सर्वदैव ब्रह्मणि आत्मभावं वर्तते। परं ब्रह्मणि अस्यात्मभावस्य नित्यविद्यमानत्वेऽपि अब्रह्मणि आत्मभावः भासते। शान्तः, स्थिरः पुरुषः यदा ब्रह्मजिज्ञासुः भूत्वा शास्त्रविहितोपदेशानुसारेण आचार्यस्योपदेशानुसारेण च तादृशं प्रज्ञां प्राप्नोति तदा तस्यात्मनः विषये पुनः प्रश्नानां स्थानं न भविष्यति; यतो हि एषः आत्मसाक्षात्कारः सर्वेभ्यः लौकिकेभ्यः प्रियतरः अस्ति। अतो आत्मैव दर्शनयोग्यः। पूर्वमाचार्येण शास्त्रपठनेन च तत्त्वमिदं ज्ञातव्यं, ततः तर्केन तत्त्वस्यास्य विचारार्थं संवादस्य संभाषणस्य वा आवश्यकता स्वीकरणीया। केवलं आचार्यस्योपदेशं गृहीत्वा मनसि उत्पद्यमानानां प्रश्नानां च समाधानं तर्केन न कृत्वा सम्यक् तत्त्वज्ञानस्य अधिकारी अपि भवितुं न शक्यते। अतः सम्यग्रूपेण आत्मज्ञानप्राप्त्यर्थं संवादप्रवाहः संभाषणप्रवाहः वा अतीव महत्त्वपूर्णः भवति इति शम्।

ISSN: 2583-4630
सुरधुनी (Suradhunī)
अन्तरराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता)
An International Sanskrit E-Research Journal (Peer Reviewed)
Volume-3, Issue-3 (Special Issue), July-September, 2023
Name of Issuing- वैदिकवाङ्मये दर्शनतत्त्वविमर्शः
(Philosophical Thoughts in Vedic Literature)

- **सहायकग्रन्थानां सूची**


1. उपनिषद्, गीत प्रेस, गोरक्षपुर।
2. गम्भीरानन्दः, स्वामी, उपनिषद् ग्रन्थावली, उद्बोधन कार्यालयः, 26तमः पुनर्मुद्रण: नभेम्बर, 2021, कलकाता।
3. घाटे, भि. एस्., द्य वेदान्त, द्य भाण्डारकर ओरियेन्टाल रिसार्च इन्स्टिटिट्युट्, 1926, पुना।
4. डयसन, पल्, द्य सिष्टेम अफ् द्य वेदान्त, अथोराइज्ड् ट्रान्सलेशन् वाइ चार्लस् जनसन्, मोतिलाल वनारसि दास, रिप्रिन्टेड–1972, दिल्लि।
5. तत्त्वभूषण, सीतानाथः, बृहदारण्यक उपनिषद्, 1928, कलिकाता।
6. वन्द्योपाध्यायः, उदयचन्द्रः, वेदसंकलन, संस्कृत वुक डिपो, पुनर्मुद्रण: जुलाइ 2006, कलकाता।
7. वन्द्योपाध्यायः, शान्तिः, वैदिक साहित्येर् रूपरेखा, संस्कृत पुस्तक भाण्डारः, तृतीयः परिवर्धितः संस्करणः, अगास्ट, 2003, कलकाता।
8. भट्टाचार्यः, सुकुमारी, इतिहासेर आलोके वैदिक साहित्य, पश्चिमवङ्गः राज्य पुस्तक पर्षद्, प्रथममुद्रण: जानुयारी, 1960, कलकाता।
9. मधुसूदनः, सरस्वती, अद्वैतसिद्धिः, सम्पा. अनन्तकृष्णः शास्त्रीः, निर्णयसागरः प्रेसः, 1937, वम्बे।
10. मुखोपाध्यायः, सतीशचन्द्रः, छान्दोग्योपनिषद्, वसुमती साहित्य मन्दिरः, परिवर्धितः द्वितीयसंस्करण: 1936, कलिकाता।
11. मूलर, एफ्. म्याक्स, द्य स्यक्रेड वुकस् अफ् द्य इष्ट, भल्युम् – 4 & 10, क्लेरेनडन् प्रेसः, 1881 & 1895, अक्सफोर्ड, लण्डन।
12. शास्त्री, अनन्तकृष्णः, ब्रह्मसूत्रभाष्यम्, निर्णयसागरप्रेसः, 1938, वोम्बे।
13. हिरियाना, एम्, आउट्लाइन्स् अफ् इण्डियान फिलसफि, मोतिलाल वनारसिदासः पाव्लिशार्सः प्राइभेट लिमिटेड, रिप्रन्ट: 2005, दिल्लिः।


- **तथ्यसूत्राणि**

1. सरदार फजलुल करिम, दर्शकोशः, पृ– 135–136
2. आनन्दरूपममृतं यद्विभाति – मुण्डकोपनिषदि, 2.2.7

ISSN: 2583-4630
सुरधुनी (Suradhunī)
अन्तरराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता)
An International Sanskrit E-Research Journal (Peer Reviewed)
Volume-3, Issue-3 (Special Issue), July-September, 2023
Name of Issuing- वैदिकवाङ्मये दर्शनतत्त्वविमर्श:
(Philosophical Thoughts in Vedic Literature)

3. The words upa+as, "to sit before someone or something (in adoration)", and upa+sad (upa+ni+sad does not occur in the Upanishads), "to seat oneself before someone (for the purpose of instruction)," are, according to prevailing usage, to be carefully distinguished from one another. – Paul Deussen, Philosophy of the Upanishads, p.-13
4. The history and genius of the Sanskrit language leave little doubt that Upanishad meant originally session, particularly a session consisting of pupils, assembled at a respectful distance round their teacher. Maxmuller, Sacred Books of the East, Vol. I, p.-ixxxi.
5. बृहदारण्यकोपनिषदि, 1.1.1
6. बृहदारण्यकोपनिषदि, 6.3.1
7. महानारायणोपनिषदि, 25.1
8. मुण्डकोपनिषदि, 1.2.13
9. कठोपनिषदि, 1.3.13
10. श्वेताश्वेतरोपनिषदि, 6.22
11. महानारायणोपनिषदि, 24.1
12. Hhps://www.roddure.com/encyclopedia/literary glossary/what is dialogue/
13. सुरभिः वन्द्योपाध्यायः, शव्दार्थकोषः, पृ– 106
14. सरदार फजलुल करिम, दर्शकोशः, पृ– 135–136
15. दृप्तवालाकिर्हानूचानो गार्ग्य आस स होवाचाजातशत्रुं काश्यं ब्रह्म ते व्रवाणीति– बृहदारण्यकोपनिषदि, 2.1.1
16. स होवाचाजातशत्रुर्यत्रैष एतत्सुप्तोऽभूद्य एष विज्ञानमयः पुरुषस्तदेषां प्राणानां विज्ञानेन विज्ञानमादाय .........प्राणो भवति गृहीता वाग् गृहीतं चक्षुर्गृहीतं श्रोत्रं गृहीतं मनः। – बृहदारण्यकोपनिषदि, 2.1.17
17. स यथोर्णनाभिस्तन्तुनोच्चरेद्यथाग्नेः क्षुद्राः विस्फुलिङ्गा व्युचरन्त्येवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि व्युचरन्ति .... – बृहदारण्यकोपनिषदि, 2.1.20
18. न होवाच न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति ....... वित्तं प्रियं भवत्यात्मनस्तु कामाय वित्तं प्रियं भवति – बृहदारण्यकोपनिषदि, 2.4.5
19. आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनि खल्वरे दृष्टे श्रुते मते विज्ञातं इदं सर्वं विदितम्। – बृहदारण्यकोपनिषदि, 4.5.6

ISSN: 2583-4630
सुरधुनी (Suradhunī)
अन्तरराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता)
An International Sanskrit E-Research Journal (Peer Reviewed)
Volume-3, Issue-3 (Special Issue), July-September, 2023
Name of Issuing- वैदिकवाङ्मये दर्शनतत्त्वविमर्शः
(Philosophical Thoughts in Vedic Literature)

20. यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयत्येष स आत्मान्तर्याम्यमृतः। – बृहदारण्यकोपनिषदि, 3.7.3
21. विज्ञानमानन्दं ब्रह्म रातिर्दातुः परायणं तिष्ठमानस्य तद्विद इति – बृहदारण्यकोपनिषदि, 3.9.28
22. आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनि खल्वरे दृष्टे श्रुते मते विज्ञातं इदं सर्वं विदितम्। – बृहदारण्यकोपनिषदि, 4.5.6
23. यथा सोम्य! एकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्यात्, वाचारम्भरणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्। – छान्दोग्योपनिषदि, 6.1.4
24. कठोपनिषदि, 1.2.13
25. एषः सर्वेषु भूतेषु गूढ आत्मा न प्रकाशते।
दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः।। – कठोपनिषदि, 1.3.12
26. तान् वरिष्ठः प्राण उवाच। मा मोहमापद्यथाऽमेवैतत् पञ्चधात्मानं ..... विधारयामीति तेऽश्रुद्दधाना वभूवुः।– प्रश्नोपनिषदि, 2.3
27. स यथा सोम्य वयांसि वासोवृक्षं सम्प्रतिष्ठन्ते एवं ह वै तत् सर्वं पर आत्मनि सम्प्रतिष्ठते।– प्रश्नोपनिषदि, 4.7